# 2015

## M. A. Part–II Examination

## SANSKRIT

### PAPER—VI

*Full Marks* : 100

*Time* : 4 Hours

*The figures in the right hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

## First Half

( Marks–50)

1. कार्यानुकृतान्वयव्यतिरेकि कारणमिति कारणलक्षणं न्यायवैशेषिकमते साधु न वेति विचार्य केशवमिश्रकृतं कारणलक्षणं तस्य भेदाश्च सोदाहरणं वर्ण्यन्ताम् । 4+4+5

अथवा

केशवमिश्रसम्मतं प्रत्यक्षलक्षणम् उच्यताम् । प्रत्यक्षं कतिविधं भवति? प्रत्यक्षस्य करणं कतिविधम्? सर्वमेतत् सोदाहरणम् आलोच्यताम् । 2+2+9

2. कस्यचिदेकस्य टीका लेख्या — 6

विरुद्ध-हेत्वाभासः, इन्द्रियम्, पृथिवी

3. अधोलिखितेषु प्रश्नेषु यथेच्छं प्रश्नत्रयं देवनागरीलिप्या संस्कृतभाषया च पूर्णवाक्येन समाधेयम् । 2×3=6

a) सन्निकर्षः कतिविधः ? के च ते ?

b) प्रत्यक्षप्रमाणलक्षणं किम्? प्रत्यक्षं विहाय अन्यानि कानि प्रमाणानि तर्कभाषाकारेण स्वीकृतानि ?

c) तर्कभाषाकारमते हेतुः कतिविधः? के च ते ?

d) तर्कभाषाकारमते हेतोः पञ्च रूपाणि कानि ?

e) तर्कभाषाकारमते कति हेत्वाभासाः? के च ते ?

f) न्यायमते कति पदार्थाः ? के च ते ?

4. संक्षेपेणालोच्यन्तां सत्कार्यवादप्रसाधका हेतवः । 13

अथवा

सांख्यसम्मतं प्रत्यक्षलक्षणसूत्रमालोच्यताम् ।

5. सांख्यासम्मतम् अनुमानलक्षणसूत्रमुल्लिख्य तस्य भेदाः संक्षेपेणालोच्यन्ताम् । 6





अथवा

सप्रसङ्गं व्याख्यायताम् —

प्रदीपवच्चार्थतो वृत्तिः ।

6. अधोलिखितेषु यथेच्छं प्रश्नत्रयं पूर्णवाक्येन समाधेयम् । (सुरगिरा देवनागरीलिप्या च) — 2×3

a) कतिविधं दुःखं सांख्यदर्शनस्याभिमतम् ? कानि च तानि ?

b) आप्तवचनमित्यत्र कोऽर्थः आप्तशब्दस्य ?

c) सत्त्वरजस्तमसां साम्यावस्था केन नाम्नोच्यते ?

d) तन्मात्राणि कति ? नाम्ना उल्लिख्यन्ताम् ।

e) अहंकारः कस्य तत्त्वस्य परिणामः ?

## Second Half

(Marks–50)

1. अधोलिखितेषु द्वयोरुत्तरं देयम् — 10×2

क) अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये॥

— व्याख्यायतामयं श्लोकः। अत्र ब्रह्मणः कीदृशं लक्षणं प्रतिपादितमित्यपि लेखनीयम् ।

ख) अज्ञानस्य लक्षणमुल्लिख्य तत्स्वरूपं विशदं व्याख्येयम् ।

ग) आत्मविषये विविधानि मतान्युल्लिख्य सिद्धान्तः प्रतिपादनीयः ।

घ) वेदान्तसाररीत्या पञ्चीकरणप्रक्रिया प्रतिपादनीया ।

2. अधोलिखितेषु एकस्य व्याख्या कार्या — 5

क) अज्ञानस्य शक्तिद्वयम् । ख) वेदान्तलक्षणम् ।

ग) इन्द्रियम् । घ)भागलक्षणा ।

3. अधोलिखितेषु एकः प्रश्नः समाधेयः — 12

क) को नाम शब्दः भाष्यकारमनुसृत्य विचार्य सिद्धान्तः प्रतिपादनीयः ।

ख) शब्दानामनुशासनं कथं कर्तव्यम् ? विविधान् पक्षानुल्लिख्य विचार्य च सिद्धान्तः समुपस्थापनीयः ।

ग) आकृतिः पदार्थः द्रव्यं वा ? अत्र वैयाकरणानां कः सिद्धान्तः ? सयुक्तिकमुपपादनीयम् ।

4. क) चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश ॥ 7

ख) दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥

5. अधोलिखितेषु एकस्य व्याख्या कार्या — 6

क) अथ सिद्धशब्दस्य कः पदार्थः? नित्यपर्यायवाची सिद्धशब्दः ।

ख) अथवा कूपखानकवदेतद् भविष्यति ।

ग) अथ शब्दानुशासनम् ।

—o—